दोषा, स्त्री, ( दुष्यतेऽन्धकारेणेति । दुष् + घञ् + टाप् । ) रात्रिः । ( यथा, आर्य्यासप्तशत्याम् । २६८ ।
"दोषदृशा कुलयुवतिर्वैदग्ध्येनैव मलिनतामेति । दोषा अपि भूषायै गणिकायाः शशिकलायाश्च ॥"
दाम्यत्यनेनेति । दम् + "दमेर्डोसिः ।" उणां । २ । ६६ । इति डोसिः । भागुरिमते टाप् । ) भुजः । इति मेदिनी । षे, १५ ॥

दोषा, व्य, ( दुष्यत्यत्रेति । दुष् + "आः समिण्-निकषिभ्याम् ।" उणां । ४ । १७४ । इत्यत्र । "बाहुलकात् दिविदुषिभ्याञ्च ।" इत्युज्ज्वलदत्तोक्तेः आः । ) "स्वरादिनिपातमव्ययम् ।" १ । १ । ३७ । इति स्वरादिपाठात् अव्ययत्वम् । ) नक्तम् । रजन्याम् इत्यर्थः । इत्यमरः । ३।४।३ ॥ ( यथा, माघे । ४ । ४६ ।
"दोषापि नूनमहिमांशुरसौ किलेति व्याकोशकोकनदतां दधते नलिन्यः ॥")
निशासुखम् । इति हेमचन्द्रः ॥

दोषाकरः, पुं, ( दोषा रात्रौ करो यस्य । यद्वा, दोषां करोतीति । दोषा + कृ + बाहुलकात् टः । ) चन्द्रः । यथा, ज्योतिषतत्त्वे ।
"मूलत्रिकोणनिजमन्दिरगोऽथ पूर्णो
मित्रर्क्षसौम्यग्रहगोऽथ तदीक्षितो वा ।
यामित्रवेधविहितानपहृत्य दोषान्
दोषाकरः सुखमनेकविधं विधत्ते ॥"
( यथा च, प्रद्युम्नविजये । ६ । ३ ।
"दोषाकराङ्कमलिनाम्बरशिञ्जिता ते
पञ्चप्रसूनशरता च मनोभवस्य ।
प्रागल्भमस्य जगताश्च समीरणस्य
मन्येऽद्य पुण्यजनतैव निशाचराणाम् ॥")
दोषाणामाकरश्च ॥

दोषाक्लेशी, स्त्री, ( दोषां भुजं क्लिश्नातीति । क्लिश् + अण् । गौरादित्वात् ङीष् । ) वनवर्व्वरिका । इति राजनिर्घण्टः ॥

दोषातनः, त्रि, ( दोषा रात्रौ भवः इति । दोषा + "सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च ।" ४ । ३ । २३ । इति ट्युः तुट् च । ) रात्रिभवः । इति व्याकरणम् ॥

दोषातिलकः, पुं, ( दोषाया रजन्यास्तिलक इव । ) प्रदीपः । इति त्रिकाण्डशेषः ॥

दोषास्यः, पुं, ( दोषा रात्रिरास्यमिव यस्य । दोषातिलकत्वादस्य तथात्वम् । ) प्रदीपः । इति शब्दचन्द्रिका ॥

दोषिकः, पुं, ( दोषाः वातपित्तकफाः कारणत्वेन सन्त्यस्येति । ठन् । ) रोगः । इति शब्दचन्द्रिका ॥

दोषी, [ न् ] त्रि, ( दुष्यतीति । दुष् + "संपृचानुरुधाङ्यमाङ्यसपरिसृसंसृजेति ।" ३ । २ । १४२ । इति घिनुण् । ) दोषयुक्तः । अपराधी । दोषशब्दादस्त्यर्थे इनिप्रत्ययेन निष्पन्नः इति वा ॥

दोषैकदृक्, [ श् ] त्रि, ( दोषे एवैकस्मिन् न तु गुणांशे दृक् ज्ञानमस्येति । यद्वा, दोषमेव एकं केवलं पश्यतीति । दृश + क्विप् । ) दोषमात्रदर्शी । यो गुणं त्यक्त्वा केवलं दोषमेव पश्यति सः । दोषे एकस्मिन्नेव ज्ञानं यस्य सः । इति भरतः ॥ तत्पर्य्यायः । पुरोभागी २ । इत्यमरः । ३ । १ । ४६ ॥

दोस्थः, पुं, ( दोषि हस्ते तदाश्रया दोर्व्यापारे वा तिष्ठतीति । स्था + कः । ) क्रीड़ा । क्रीड़कः । सेवा । सेवकः । इति त्रिकाण्डशेषः ॥ दोःस्थिते, त्रि ॥

दोहः, पुं, ( दोग्धि अस्मिन्निति । दुह + आधारे घञ् । ) दोहनपात्रम् । इति शब्दचन्द्रिका ॥ ( यथा, भागवते । ४ । १८ । २७ ।
"एवं पृथ्वादयः पृथ्वीमन्नादाः स्वन्नमात्मनः ।
दोहवत्सादिभेदेन क्षीरभेदं कुरूद्वह ! ॥"
दुह्यते इति । दुह् + कर्म्मणि घञ् । ) दुग्धम् । ( "दुह्यते इति दोहः क्षीरं तस्य गोदोहस्य विकारः हैयङ्गवीनम् ।" इति सिद्धान्तकौमुदी । दुह् + भावे घञ् । ) दोहनम् ॥ ( यथा, रघुः । २ । २३ ।
"दोहावसाने पुनरेव दोग्ध्रीं
भेजे भुजोच्छिन्नरिपुर्निषण्णाम् ॥" )

दोहजं, क्ली, ( दोहात् दोहनाज्जायते इति । दोह + जन् + डः । ) दुग्धम् । इति शब्दार्थकल्पतरुः ॥

दोहड़िका, स्त्री, छन्दोविशेषः । इति छन्दोमञ्जरी ॥ दोहा इति भाषा । अस्य विवरणं छन्दःशब्दे द्रष्टव्यम् ॥

दोहदं, क्ली, ( दोहमाकर्षणं ददातीति । दोह + दा + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः । ) इच्छा । इत्यमरः । १ । ७ । २७ ॥

दोहदः, पुं, क्ली, ( दोहमाकर्षं ददातीति । दा + कः । ) गर्भिण्यभिलाषः । साद इति भाषा । तत्पर्य्यायः । दौर्हृदम् २ श्रद्धा ३ लालसा ४ । इति हेमचन्द्रः । ३ । २०५ ॥ जातुजः ५ । इति रत्नकोषः ॥ ( यथा, याज्ञवल्क्यसंहितायाम् । ३ । ७९ ।
"दोहदस्याप्रदानेन गर्भो दोषमवाप्नुयात् ।
वैरूप्यं मरणं वापि तस्मात् कार्य्यं प्रियं स्त्रियाः ॥")
गर्भचिह्नम् । इति भरतधृतकोषान्तरम् ॥ (पुष्पोद्गमकौषधम् । यथा, रघौ । ८ । ६२ ।
"कुसुमं कृतदोहदस्त्वया
यदशोकोऽयमुदीरयिष्यति ।
अलकाभरणं कथं नु तत्
तव नेष्यामि निवापमाल्यताम् ॥"
यथा च, मेघदूते । ७८ ।
"रक्ताशोकश्चलकिशलयः केशरश्चात्र कान्तः
प्रत्यासन्नः कुरुवकवृतेर्माधवीमण्डपस्य ।
एकः सख्यास्तव सह मया वामपादाभिलाषी
काङ्क्षत्यन्यो वदनमदिरां दोहदच्छद्मनास्याः ॥"
अत्र यस्य यो दोहदः स धृतो मल्लिनाथेन यथा,—
"स्त्रीणां स्पर्शात् प्रियङ्गुर्विकसति बकुलः शीधुगण्डूषसेकात्
पादाघातादशोकस्तिलककुरुवकौ वीक्षणालिङ्गनाभ्याम् ।
मन्दारो नर्म्मवाक्यात् पटुमृदुहसनात् चम्पको वक्त्रवातात्
चूतो गीतान्नमेरुर्विकसति च पुरो नर्त्तनात् कर्णिकारः ॥" )

दोहदलक्षणं, क्ली, ( दोहदस्य गर्भस्य लक्षणं यत्र । ) वयःसन्धिः । गर्भः । इति मेदिनी । णे, ११७ ॥

दोहदवती, स्त्री, ( दोहदो गर्भिण्यभिलाषोऽस्त्यस्या इति । दोहद + मतुप् मस्य वः । ङीप् च । ) अन्नपानादिद्रव्यविशेषाभिलाषवती गर्भवती । इति भरतः ॥ तत्पर्य्यायः । श्रद्धालुः २ । इत्यमरः । २ । ६ । २१ ॥ * ॥ गर्भिणीकर्त्तव्याकर्त्तव्यं यथा,—
"दित्यां गर्भमथाधत्त कश्यपः प्राह तां पुनः ।
त्वया यत्नो विधातव्यः अस्मिन् गर्भे वरानने ! ॥
संवत्सरशतन्त्वेकमस्मिन्नेव तपोवने ।
सन्ध्यायां नैव भोक्तव्यं गर्भिण्या वरवर्णिनि ! ॥
न स्थातव्यं न गन्तव्यं वृक्षमूलेषु सर्व्वदा ।
नोपस्करेषूपविशेन्मुषलोलूखलादिषु ॥
जलञ्च नावगाहेत शून्यागारञ्च वर्ज्जयेत् ।
वल्मीकेषु न तिष्ठेत न चोद्विग्नमना भवेत् ॥
विलिखेन्न नखैर्भूमिं नाङ्गारेण न भस्मना ।
न शयालुः सदा तिष्ठेद्व्यायामञ्च विवर्ज्जयेत् ॥
न तुषाङ्गारभस्मास्थिकपालेषु समाविशेत् ।
वर्ज्जयेत् कलहं लोकैं गात्रभङ्गञ्च वर्ज्जयेत् ॥
न मुक्तकेशा तिष्ठेत नाशुचिः स्यात् कदाचन ।
न शयीतोत्तरशिरा न चापरशिराः क्वचित् ॥
न वस्त्रहीना नोद्विग्ना न चार्द्रचरणा सती ।
नामाङ्गल्यां वदेद्वाक्यं न च हास्याधिका भवेत् ॥
कुर्य्याच्च गुरुशुश्रूषां नित्यमङ्गलतत्परा ।
सर्व्वौषधीभिः कोष्णेन वारिणा स्नानमाचरेत् ॥
कृतरक्षा सुभूषा च वास्तुपूजनतत्परा ।
तिष्ठेत् प्रसन्नवदना भर्त्तुः प्रियहिते रता ॥
दानशीला तृतीयायां पार्व्वत्या नक्तमाचरेत् ।
इतिवृत्ता भवेन्नारी विशेषेण तु गर्भिणी ॥
यस्तु तस्या भवेत् पुत्त्रः शतायुर्वृद्धिसंयुतः ।
अन्यथा गर्भपतनमवाप्नोति न संशयः ॥
तस्मात्त्वमनया वृत्त्या गर्भेऽस्मिन् यत्नमाचर ॥"
इति मत्स्यपुराणम् ॥

दोहदान्विता, स्त्री, ( दोहदेन गर्भजनिताभिलाषेण अन्विता । ) दोहदवती । इति हेमचन्द्रः । ३ । २०३ ॥

दोहनं, क्ली, ( दुह + भावे ल्युट् । ) स्तनाद्दुग्धनिःसारणम् । दोया इति भाषा । दुहधातोर्भावेऽनट्प्रत्ययेन निष्पन्नम् ॥ ( दुह्यतेऽस्मिन्निति । दुह + आधारे ल्युट् । दोहनपात्रम् । यथा, महाभारते । १३ । ६४ । ४१ ।
"कालजेन निदानेन कांस्यं भवतु दोहनम् ।
दुह्येत परवत्सेन यस्ते हरति पुष्करम् ॥" )

दोहनी, स्त्री, ( दुह्यते अस्यामिति । दुह् + आधारे ल्युट् । ङीप् । ) दोहनपात्रम् । तत्पर्य्यायः ।